अस्मिन् प्रश्नपत्रपुस्तिकायाम् 28 प्रश्नाः [ खण्ड–क (20) + खण्ड–ख (4+4) ] एवं 8 पृष्ठाः सन्ति ।

Roll No.
अनुक्रमांक

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | |

Code No. 63/SS/A/S
कोड नं.

SET/सेट **A**

# SANSKRIT
## संस्कृतम्
## (309)

00005545

**Day and Date of Examination**
(परीक्षादिवसः दिनाङ्कश्च) ____________________

**Signature of Invigilators** 1. ____________________
(निरीक्षकयोः हस्ताक्षरम्)
2. ____________________

**सामान्य अनुदेशाः :**

1 परीक्षार्थी प्रश्नपत्रपुस्तिकायाः प्रथमपृष्ठे स्व–अनुक्रमाङ्कम् अवश्यं लिखतु ।

2 निरीक्ष्यतां यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारं सन्ति न वा इत्यपि निरीक्षणीयम् ।

3 उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति ।

4 स्व–उत्तरपुस्तिकायां प्रश्नपत्रस्य कूट(कोड) संख्या **63/SS/A/S, सेट-A** अवश्यमेव लेखनीया ।

# SANSKRIT

# संस्कृतम्

# (309)

समय : होरात्रयम् ]                                        [ पूर्णाङ्काः – 100

निर्देशाः – (i) अस्मिन् प्रश्नपत्रे द्वौ खण्डौ स्तः । खण्ड – क (केन्द्रिकः पाठ्यक्रमः), खण्ड – ख (वैकल्पिक–I एवं वैकल्पिक–II) स्तः ।

(ii) खण्ड – क अनिवार्यः । अस्मिन् खण्डे 20 प्रश्नाः सन्ति ।

(iii) खण्ड – ख **एकः** एव वैकल्पिकः समाधेयः ।

(iv) खण्ड – क कृते 85 अङ्काः, खण्ड – ख संस्कृतं संस्कृतिश्च अथवा प्रयोजनमूलकसंस्कृतम् इति वैकल्पिकयोः केवलम् एकः एव वैकल्पिकः समाधेयः । अस्य कृते 15 अङ्काः निर्धारिताः ।

## खण्ड – क

## (केन्द्रिकः पाठ्यक्रमः)

1 अधोलिखितेषु कस्यचिदेकस्य पाठस्य सारं षड्वाक्येषु लिखत – 6

(क) क्रोधोऽनर्थकारकः

(ख) शल्यचिकित्साजनकः सुश्रुतः

(ग) परार्थे आत्मोत्सर्गः

2 अधोलिखितं गद्यांशं पठित्वा प्रश्नान् संस्कृतेन उत्तरत – $1 \times 4 = 4$

विमानशास्त्रे सौर–ऊर्जांप्रयुज्य सञ्चार्यमाणानि विमानानि वर्णितानि । भारद्वाजस्य यन्त्रसर्वस्वं भोजराजस्य समराङ्गण सूत्रधारम् इत्यादयः अनेके ग्रन्थाः विमानशास्त्रस्य परिचयं कारयन्ति । एवं विपुलं ज्ञानराशिः वर्तते संस्कृतवाङ्मये । अत एव उपनिषत्सु कथितम् – स्वाध्यायान्मा प्रमदः ।

**प्रश्नाः –**

(क) विमानशास्त्रे कानि वर्णितानि ?

(ख) भारद्वाजस्य ग्रन्थस्य किं नाम ?

(ग) संस्कृतवाङ्मये कीदृशः ज्ञानराशिः वर्तते ?

(घ) 'स्वाध्यायान्मा प्रमदः' – इति कुत्र कथितम् ?

3 अधोलिखितानां प्रश्नानाम् उचितमुत्तरं कोष्ठकात् चित्वा लिखत – 1×4=4

(क) द्वितीयः बन्धुः किम् आदाय गृहं गतवान् ? (स्वर्णम्/रजतम्)

(ख) शैवालघोषो नाम पर्वतः कुत्र अस्ति ? (उत्तरदेशे/मध्यदेशे)

(ग) कल्पना चावला कति वारं अन्तरिक्षयात्रां कृतवती ? (एकवारं/द्विवारं)

(घ) असंस्कृत मतयोऽपि के मान्याः ? (मुनयः/साधवः)

4 (क) निम्नाङ्कितं रेखांकितपदमाश्रित्य प्रश्ननिर्माणं कुरुत – 1×2=2

(i) कन्याकुमारी तत्रैव एकपदेन स्थित्वातपः आचरितवती ।

(ii) पुत्रलिका कथां श्रावयति ।

(ख) प्रश्नान् उत्तरत – 1×2=2

(i) अस्माकं देशात् सर्वप्रथमं कः अन्तरिक्षं गतः ?

(ii) कस्य राज्ये कोऽपि जनः पापकर्मनिरतः नासीत् ?

5 एतत् कथनं कः कं प्रति कथयति ? 2

(क) प्रतिजानीमः वयं न पुनः कदापि मांसं स्प्रक्ष्यामः ।

(ख) किम् एकेन फलेनतस्य दारिद्रयंदूरीभविष्यति ?

6 अधोलिखितं पद्यांशद्वयं पठित्वा प्रश्नान् उत्तरत – 2+2=4

(क) इन्द्रियाणि प्रसीदन्ति सुत्वग् भवति चाननम् ।
निद्रालाभः सुखं च स्यान्मूर्ध्नितैलनिषेवणात् ॥

**प्रश्नद्वयम् –**

(i) कस्मात् इन्द्रियाणि प्रसीदन्ति ?

(ii) सुत्वग् किं भवति ?

(ख) आत्मानं रथिनं विद्धि शरीरं रथमेव तु ।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥

**प्रश्नद्वयम् –**

(i) शरीरस्य स्वामी कः ?

(ii) कस्य नियंत्रणेन शरीरं सम्यक् चलति ?

7 अधोलिखितयोः अन्वयद्वयोः रिक्तस्थानपूर्तिं कुरुत – 2

(क) वहन्ति वर्षन्ति नदन्ति भान्ति ध्यायन्ति नृत्यन्ति समाश्वसन्ति ।
नद्यो घना मत्तगजावनान्ताः प्रियाविहीनाः शिखिनः प्लवंगाः ॥

अन्वयः –

नद्यः वहन्ति, घनाः वर्षन्ति, मन्तगजा नदन्ति, वनान्ताः ________ प्रियाविहीनाः ध्यायन्ति ________ नृत्यन्ति, प्लवंगाः समाश्वसन्ति ।

(ख) किं मरणं मूर्खत्वं, किं चानर्धं यदवसरे दत्तम् ।
आमरणात् किं शल्यं प्रच्छन्नं यत्कृतं पापम् ॥

अन्वयः –

मरणं, किम्, मूर्खत्वम्, किं च अनर्धं यत् ________ दत्तम् आमरणात् किम् शल्यम् यत् ________ कृतम् पापम् ।

8 अधोलिखित पद्यांशद्वयस्य भावार्थयोः रिक्तस्थानानि पूरयत – 2

(क) पातुं कर्णाञ्जलिभिः किममृतमिह युज्यते सदुपदेशः ।

भावार्थः –

________ अञ्जलिसदृशैः कर्णैः अस्मिन् संसारे ________ अमृतं पातुं युज्यते ।

(ख) एको हि दोषो गुणसंनिपाते निमज्जतीन्दोः किरणेष्विवांकः ।

भावार्थः –

गुणानां समूहे स्वल्पः ________ न दृश्यते ।

9 पद्यांशं 'अ' स्तम्भात् 'ब' स्तम्भेन सह मेलयत – 2

| स्तम्भ–'अ' | स्तम्भ–'ब' |
|---|---|
| (i) किं समुद्रसमं | (क) बभूव पुरुषाधमः |
| (ii) आमेखलं सञ्चरतां घनानाम् | (ख) योजानाति स पण्डितः |
| (iii) परहिंसा रतिः क्रूरो | (ग) द्यौः समुद्रसरं सरः |
| (iv) अकारादिसकारान्तं | (घ) छायामधः सानुगतां निषेव्य |

10 'पतन्ति पर पीडकाः' इति नाटकस्य सारांशं षड्वाक्येषु लिखत । सहायतायै बिन्दवः दत्ताः – 6

**बिन्दवः**

कंसः घातयितुं कृष्णं इच्छति – कृष्णबलरामौ गतवन्तौ मथुरा – कंसः उदविग्नः मल्लद्वारा तौ हन्तुमिच्छति – पराक्रमं कृष्णः प्रदर्शितवान् चाणूरकृष्णयोः मुष्टिकबलरामयोः घोरं मल्लयुद्धं कृष्णः कंसं घातयति पिता वासुदेवौ पुत्रौ स्नेहं करोति आशीर्वादं च यच्छति ।

**11** अधोलिखितं नाट्यांशद्वयं पठित्वा प्रश्नान् उत्तरत –

(क) सर्वे यक्षा : कुतोऽस्मिन् घोरे विपिने संगीतकम् ? कोऽयम् वंशीवादकः । एत, एत पश्यामः । ध्वनिम् अनुसरन्तो यामः । **1+1=2**

प्रथमः – तर्कयामि, नातिदूरे कश्चन मुरलीं वादयति ।

द्वितीयः – अहो ज्ञायतेऽधुना यत्रैता गावो विचरन्ति तत्समीपे एव तेन मुरलीवादकेन भवितव्यम् ।

तृतीय यक्ष – पश्यत, पश्यत, वटतरूतले निषण्णः कश्चिद् युवा वंशीं ध्वनति । तमुपसर्वामः ।

**प्रश्नाः –**

(i) यक्षाः कुत्र यान्ति ?

(ii) युवा कुत्र निषण्णः वंशीं ध्वनति ?

(ख) विस्तीर्णलोहितमुखः परिवृत्तनेत्रो, **1×2=2**
भग्नांसकण्ठकटिजानुकेरारुजङ्धः ।
विच्छिन्नहारपतिताङ्मदलम्बसूत्रो,
वज्रप्रमग्नशिखरः पतितो यथाद्रिः ॥

**प्रश्नाः –**

(i) कृष्णः शिरसिकं निगृह्य पातयति ?

(ii) कंसः केन सदृशः पतितः ?

**12** अधोलिखितं गद्यांशं पद्यांशं च पठित्वा उभयोः प्रदत्तप्रश्नान् उत्तरत –

(क) गद्यांशः

'माता गुरुतरा भूमेः' इति कथनानुसारेण माता भूमेरपि श्रेष्ठावर्तते । माता शिशुं स्वकुक्षौनवमासपर्यन्तं संस्थाप्य जन्मददाति । पुनरपि तं संपोष्य तेन दन्तानि कष्टानि सोढ़वा सुष्ठ पालयति । तस्मै सर्व विधं सुखं प्रदाय वर्धयति । सर्वदा एकस्यां चिन्तायामेव तिष्ठति यत् शिशवे सर्व विध–सुविधाः कथं सन्तु । स्नेहेनतंलालयति । परन्तु जनन्याः दुखं कोपि न जानाति ।

**प्रश्नाः –**

(i) माता कीदृशी कथिता ? **2**

(ii) माता शिशुं कथं वर्धयति ? **2**

(iii) गद्यांशस्य शीर्षकं लिखतु । **1**

(ख) पद्यांशः

उदेति सविता ताम्रस्ताम्र एवास्तमेति च ।
सम्पत्तौ च विपत्तौ च महतामेकरूपता ॥

**प्रश्नाः –**

(i) कीदृशः सविता उदेति ? **2**

(ii) महताम् एकरूपता कदा भवति ? **2**

(iii) पद्यांशस्य शीर्षकं लिखत । **1**

13 मञ्जूषापदसहायतया 'वसन्त–ऋतुः' इति विषयमधिकृत्य दशवाक्यानि लिखत – 1×10=10

**मंजूषा**

| |
|---|
| ऋतुषु, प्रधानः, वसन्तः मन्यते, ऋतुराजः अपि कथ्यते, वसन्ते, सर्वत्र, हरीतिमा, वनप्रान्तेषु वृक्षेषु, लतासु नवीनानि, पत्राणि, पल्लवानि, विकसन्ति, सर्वत्र शोभा, लोकेषु, नवचेतना, याति, ऋतौ, सरस्वती पूजा । |

14 भवान् आनन्दः । भवतां भ्रातुः विवाहः परश्वः भविता । अतः तदर्थं दिनद्वयस्य अवकाशाय प्रार्थनापत्रमेकं प्राचार्यम् प्रति लिखत । 6

15 भ्रातुः भगिन्याः मध्ये विद्यालयस्य वार्षिकोत्सवमुपलक्ष्य चत्वारिवाक्यानि संवादरूपेण लिखत । 1×4=4

16 रेखांकितपदे संधिच्छेदं कुरुत – 1

(क) बलं शिरः कपालानां विशेषेणाभिवर्धते ।

(ख) मरुतश्चोपशाम्यति ।

17 रेखांकितपदे का विभक्तिः किं च मूलपदम् ? 2+2=4

(क) कामण्डलवेन वारिणा समुपस्पृश्य शापजलंजग्राह ।

(ख) अनेके ग्रन्थाः विमानशास्त्रस्य परिचयं कारयन्ति ।

18 समुचितपदनिर्माणं कृत्वा रिक्तस्थानं पूरयत – 1×4=4

(क) अस्य ________ सम्यक् संरक्षणं स्यात् । (ज्ञानराशि + उचित विभक्ति)

(ख) मनसः अशान्तिः ________ जनयति । (रोग + उचित विभक्ति)

(ग) नारी अपि पुरुषः इव ________ भवति । (सबल + उचित विभक्ति)

(घ) हिमालयः ________ मानदण्डः अस्ति । (पृथिवी + उचित विभक्ति)

19 यथानिर्दिष्टं कुरुत – 1×4=4

(क) अनेकवर्णं पवनाधूतम् । (रेखांकितस्य विग्रहं कुरुत)

(ख) द्रव्यम् गोमायुयन्त्रिता । (रेखांकितस्य विग्रहं कुरुत)

(ग) अशोकस्य राज्ये एकोऽपि वृक्षः राजाज्ञां विना छेत्तुं न शक्यते स्म । (रेखांकितस्य प्रकृतिप्रत्ययं लिखत)

(घ) करेण अक्षमालाम् आक्षिप्य । (रेखांकितस्य प्रकृतिप्रत्ययं लिखत)

20 अधोलिखितवाक्ये एकम् अव्ययम् एकम् उपसर्गं च चित्वा लिखत – 2

(क) मांसरुधिरम् एव तेषां प्रियं भोजनम् ।

(ख) प्रतिजानीमः वयम् ।

## खण्ड – ख

### वैकल्पिक–I

### (संस्कृतं संस्कृतिश्च)

21 अधोलिखितकाव्यानां तेषां लेखकैः सहमेलनं कृत्वा लिखत – 2

| 'अ' | 'ब' |
|---|---|
| (i) इन्दिरागांधीचरितम् | (क) रमाकान्त शुक्लः |
| (ii) जवाहरज्योतिमहाकाव्यम् | (ख) सत्यव्रत शास्त्री |
| (iii) तदेव गगनं सैव धरा | (ग) जी. वी. पल्सुले |
| (iv) भाति मे भारतम् | (घ) श्रीनिवास रथः |

22 (क) अधोलिखितसंख्यानां कृते संस्कृतपदानि लिखत – 2

$10^2$, $10^4$, $10^6$, $10^{11}$

(ख) 'पृथिवी सूर्यं परितः परिभ्रमति' इति केन स्वग्रन्थे साधितम ? तस्य नाम्ना कः उपग्रहः निर्मितः ? 2

(ग) शल्यक्रियायाः वर्णनं प्रमुखतया कस्मिन् ग्रन्थे प्राप्यत ? तत्र सर्वप्रथमं कस्य शल्यकर्मणः वर्णनं कृतम् ? 2

(घ) विमानविषये महत्वपूर्णाः आविष्काराः कस्मिन् ग्रन्थे प्रदत्ताः ? 1

23 संस्कृतभाषायाः के द्वेरूपे स्तः ? कस्याः भाषायाः आधुनिक भारतीयभाषाणाम् उत्पत्तिः सञ्जाता ? 1+1=2

24 (क) संस्काराः क्रिमर्थं क्रियन्ते ? बाल्यावस्थायां शिशोः कति संस्काराः विधीयन्ते ? 2

(ख) शरीरे नष्टे आत्मा कं प्राप्नोति ? 1

(ग) गृहस्थाश्रमे प्रवेशाय कः संस्कारः विधीयते ? 1

## वैकल्पिक–II

## (प्रयोजनमूलकसंस्कृतम्)

**21** अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत **1×4=4**

(क) भाषायाः क्षेत्रवशात् ________ प्रयोजनानि सन्ति ।

(ख) संस्कृतभाषायाः ________ साहित्यम् ।

(ग) चरकसंहिता ________ ग्रन्थः अस्ति ।

(घ) पातञ्जलमुनेः ________ चमत्कारं यत्र–तत्र दृश्यते ।

**22** अधोलिखितान् प्रश्नान् उत्तरत – **1×4=4**

(क) वेदस्य कति अंगानि सन्ति ?

(ख) शून्य सिद्धान्तस्य मान्यता केन कृता ?

(ग) दूरदर्शने वयं प्रातः कति वादने संस्कृतसमाचारान् शृणुमः ?

(घ) पत्रपत्रिकासु कस्य कौशलस्य प्राधान्यं भवति ?

**23** संस्कृत पत्रकारितायाः कयोरपिद्वयोः क्षेत्रयोः उल्लेखं कुरुत । **2**

**24** (क) पत्रपत्रिकासु विविध विषयाणां संयोजनं कथं करणीयम् ? **1**

(ख) पत्रपत्रिकाणां प्रकाशनाय सर्वकारकार्यालये किम् अनिवार्यम् भवति ? **1**

(ग) 'संस्कृतसंभाषणसन्देशः' इति पत्रिका कुतः प्रकाश्यते ? **1**

(घ) त्रुटिशोधने प्रयुक्तम् अधोलिखितं चिह्नद्वयम् अभिप्रायेण सह मेलयत – **2**

| (अ) | (ब) |
|---|---|
| (क) (⌒) | नवीना पंक्तिः |
| (ख) (NL) | समीपम् आनेयम् |